© 2015 IJSRSET | Volume 1 | Issue 6 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099
International Journal of Scientific Research in Science, Engineering and Technology

# सुशासनव्यवस्थायै प्रयुक्तिविद्या-मौलिकचेतनाकौशलव्यवहार:



**डॉ.प्रदीप कुमार वाग्**

**सहायकाचार्यः, साहित्यविभाग:,**

**राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:**

**सारांशः–** इदानीन्तनसमाजे सर्वत्र समस्या एव परिलक्षन्ते। ता: सर्वा: अपि समस्या: अवश्य परिहर्तव्या भवन्ति। ता: समस्या: परिहाराय द्वयोरपि कौशलयो: आवश्यकता वर्तते। परन्तु प्राय: सर्वजनादृतमौलिकचेतनामाध्यमेन यथा समस्याया: समाधानं भवति तथा प्रयुक्तिविद्यामाध्यमेन भवितुं नार्हति इति मम आशयः। अतः मया एतस्मिन् विषये शोधलेखोऽयं प्रस्तुतः।

**प्रजा सुखे सुखं राज्ञः प्रजानां च हिते हितम्।नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम्।।** इत्यतः ज्ञायते पुराकाले यदा राजतन्त्रशासनमासीत् तदा प्रजासुखे एव राजा सुखी भवति स्म। प्रजाहिते तेन स्वहितम् अनुभूयते स्म। स्वात्माहितप्रिय नासीत् राजा अपि तु प्रजानां हितमेव स्वहितमिति चिन्तनमासीत् तस्य। येन सुशासनं प्रचलति स्म। सुशासनव्यवस्थायै प्रयुक्तिविद्या-मौलिकचेतनाकौशलव्यवहार: इति विषयेऽस्मिन् मुख्यत: विन्दुत्रयं विद्यते आदौ सुशासनव्यवस्था, द्वितीये प्रयुक्तिविद्याकौशलस्य व्यवहार: एवं अन्तिमे मौलिकचेतनाया: कौशलव्यवहारः।

खलु काचन शङ्का मनसि समुदेति किं नाम शासनम् ? उच्यते प्रजानां सम्यक् परिपालनमेव शासनम्। पुन: दार्शनिक: कालमासमहोदय: सुशासनस्य संज्ञाविषये एवं भणति - शासकशासितयोर्मध्ये सुसम्बन्धं भवति सुशासनमिति। वस्तुत: शासनव्यवस्था द्विधा विभज्यते – गणतन्त्रं राजतन्त्रञ्चेति। गणतन्त्रशासितदेशेषु आस्माकं भारतदेश अन्यतमः। द्वितीये प्रयुक्तिविद्याया: महत्त्वविषये किञ्चत् प्रतिपाद्ये।

का नाम प्रयुक्तिविद्या इति शङ्कायामुच्यते – **आवश्यकतापूरणनिमित्तं या कापि प्रचेष्टा परीक्षणमाध्यमेन सुदूरप्रसारीक्रियते सा प्रयुक्तिविद्या। पुनश्च उच्यते - दीर्घकालीककार्यं बहु अल्पेन समयेन अल्पार्थव्ययेन च यथा कर्तुं शक्नुयात् सा भवति प्रयुक्तिविद्या।।**

प्रयुक्तिविद्यायाः समर्थनं कृत्वा स्वामी विवेकानन्दमहोदयाः एवं वदन्ति - एकं बालकं प्रति अवश्यं प्रयुक्तिविद्यायाः ज्ञानं दद्यात्, येन सः स्वयमेव तस्य व्यवहारं कृत्वा स्वस्य कार्यं कुर्वन् आत्मनिर्भरशीलः भवेत्। पुनश्च भारतवर्षस्य इदानीन्तनप्रधानमन्त्रि-श्रीयुक्तनरेन्द्रमोदीमहोदयाः एवं वदन्ति -

**प्रयुक्तिविद्यायाः व्यवहारस्तु बालक-बालिकानां मौलिकाधिकारः। यदि ततः तान् सर्वान् निवार्यते तर्हि पापमेव। इतः प्रयुक्तिविद्यायाः साम्प्रतिकसमाजे आवश्यकता कियन्ती अस्ति इति ज्ञायते। उदाहरणम् यथा - अन्तर्जालः , आकाशवाणी, दुरदर्शनम् , संगणकयन्त्रम् इत्यादयः।**

तृतीयबिन्दु र्भवति मौलिकचेतना। अर्थात् मूलभूतं स्वकीयं चिन्तनम्। यथा - मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव इत्यादयः मौलिकचेतनायामन्तर्भवन्ति।प्रयुक्तिविद्या, मौलिकचेतना इत्येतयोयोर्मध्ये सुशासनव्यवस्थायै कः श्रेष्ठ इति चेत मौलिक एव श्रेष्ठरूपेणाङीक्रियते। कथमिति चेत् समस्यानां निमूलनमेव सुशासनं भवति। तासां तामा समस्यानां निर्मलनम् अधिकतया मौलिकचेतनामाध्यमेन भवितुमर्हति। अतः मौलिकचेतना श्रेष्ठा। मौलिकचेतनाकौशलव्यवहारस्य श्रेष्ठत्वं निरूपणाय अधः समस्याः तासां निरूपणं च क्रियते साम्प्रतिकसमाजे बहु समस्याः दरीदृश्यन्ते। यथा- दारिद्रता-नियुक्ति-वर्णवैषम्यवद्धि सामाजिकसांस्कृतिकसमस्या इत्यादयश्च, ताः समस्याः दूरीकरणाय कश्चन सुशासको भवेत्।तस्य सुशासकस्य चरित्रयोग्यताविषये मनुना एवं उक्तम् - सः राजा सर्वदा सक्षम-विज्ञ-आदर्शचरित्रयक्त को जितेन्द्रीयो भवेत्। तस्य वेद-धर्मशास्त्र-दण्डनीतिविषये ज्ञानं भवेत्। पुनः धर्म-अर्थ-मोक्षप . सत्याचरणं कुर्यात्। सः प्रजानां रक्षको भवेत् न तु भक्षकः।

**<u>समस्या : तासां निराकरणोपायाश्च -</u>**

१) **चारित्रिक समस्या** – उच्यते यत् "शास्त्राण्यधित्यापि भवन्ति मुर्खा:"। अर्थात् शास्त्राणि अधित्य विद्वान् भवतु नाम यदि तस्य पार्श्वे व्यावहारिकज्ञानं नास्ति तर्हि स: मुर्ख: एव। एवं सर्वदा कटुवचनं वदति स: अध्ययने तावद् विद्वान् भवतु नाम मूर्खः सदृश: भाति समाजे। यथोच्यते हितोपदेशे -

**प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।**

**तस्मात्तदेव वक्तव्यं वचने का दरिद्रता।। इति।**

**समाधानम्** - अस्या: समस्याया: समाधानं मौलिकचेतनामाध्यमेन एव भवितुमर्हति नान्योपायेन।

२) **उत्कोचसमस्या** - इदानन्तिन समाज: सम्पुर्ण भ्रष्टाचारे मानः अस्ति। कुत्रापि किमपि उद्योग प्राप्तये रुप्यकाणि बहु दीयन्ते यत् कोऽपि ज्ञातुं न प्रभवति। यथोक्तं कौटिल्यस्य अर्थशास्त्रे -

**मत्स्या यथोऽन्तस्सलिले चरन्तो ज्ञातुं न शक्या: सलिलं पिबन्तः।**

**युक्तास्तथा कार्यविधौ नियुक्तो ज्ञातुं न शक्याः धनमाददानाः।।**

अर्थात् जले विद्यमान्नः मत्स्य: जलं पिबति वा खाद्यं खादति इति ज्ञातुं अशक्य: वयं तथैव सरकारी क्षेत्रे नियुक्तो कर्मचारी दुर्नीति करोति वा न इति ज्ञातुंमशक्यो वयम्।

समाधानम् - एषा समस्या समाधातुं अवश्यं द्वयोः अपि कौशलयो: आवश्यकता वर्तते। आदौ तावत् मौलिकचेतनाद्वारा समेषामपि भावनां परिवर्तनं करणीयं भवति पुन: यदि तेन न भवति तर्हि: C.C.TV द्वारा तान् धृत्वा दण्डो देयो भवति।

३) कृष्णधनसमस्या

भारतस्य बहनिरूप्यकाणि बहिर्देश विद्यन्ते; यस्मिन् विषय को पिडालन अवोचन यत् बहिर्देशे एतावन्ति रूप्यकाणि सन्ति यदि सर्वेषु महेषु १५ला दीयते विधान न भवतीति। अद्यतनसमाजस्य प्रधानसमस्या भवति एषा समस्या।

**समाधानम्** - एतस्मिन् विषये ज्ञातुं तथा Software निर्मात येन यः कोऽपि बंदिशोधन स्थापयति तस्य विषये सर्वज्ञातुं शक्यते येन तस्य कृते दण्डो देयो भवति। पुनधनाना प्रत्यावर्तनधि भवति। प्रयक्तिविद्या द्वारा एषा समस्या समाधातुं शक्यते। पुनछ मौलिकचेतना द्वारापि तेषां मनः परिवर्तनं कर्तुं शक्यते। यथा - "सस्तुष्टो येन केनाचित्"। पुनः- "मयि च परितुष्ट को धनवान को दरिद्रः" इत्यादि मौलिक चेतनादावारोऽपि तेषां मन परिवतीयतुं शक्यते।

**४) परिवेशप्रदूषणसमस्या**

समस्या – इदानीं सर्वत्र प्रदूषणमेव प्रदूषणम्। सर्वेऽपि यानं चालयन्ति येन निर्गतधमेनबहवः रोगग्रस्ताः भवन्ति। येन अग्रे गत्वा यद्येवं यानं चालयन्ति तहि सर्वत्र वानमयमेव भवति किन्तु तैलस्याभाव: तु भवत्येव। एवं प्रकारकं जलप्रदूषण, वायुप्रदूषण, भूमिप्रषामित्यादय सन् पीडयिष्यन्ति।

समाधानम् - एतच्छर्वं निवारणाय प्रयुक्तिविद्या एवं च मौलिकचेतना एतयाईयो: बहु आवश्यकता वर्तते येन सर्वेऽपि अस्मिन् संसारे सुख प्राप्तुं शक्नुवन्ति। अतः अस्माकं देशस्य प्रधानमन्त्री नरेन्द्रमोदि महोदया: स्वच्छभारताभियानस्य आरम्भमकरोत्। अस्मिन् विषये तावत् मुख्यतया मौलिकचेतनाया: आवश्यकता वर्तते येन समेषामपि लाभायैव भवति।

**५) शान्तिश्रृंखलासमस्या**

मम भारतमात:महिमानं कि वदामि सर्वधर्मसमन्वयेऽस्मिन राष्ट्र सर्वेषामपि धर्मधर्माणामवस्थात अवकाश: विद्यते। तथापि अस्माकं भारतकर्षे चौर्य लुण्ठनम्, असामाजिककार्यमित्यादिकं कृत्वा ते सर्वे

पथभ्रष्टाः भवन्ति येन अस्माकं देशस्यैव हानिः भवति। समाधानम् – योलिकचेतनाद्वारा एव नैतिकवाक्यानां विषये अबवोध्य ततः तान् नीवर्ननीयं भवति।

**६) धर्षणगतसमस्या -**

उच्यते –

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।।**

**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाक्रियाः।।**

एतत्सर्वं ज्ञात्वाऽपि सन्ति केचन तावत ये एतादृशासामाजिककार्यं कुर्वन्ति येन स्वस्य हानि:, देशस्य हानि: एवं च हानि: हानिरेव।

समाधानम् - तस्याः समास्याया समाधानार्थम अवश्यं मौलिकचेतनाया: आवश्यकता भवति। कुत इति चेत् समीचिनवाक्यद्वारा कदाचित् तेषां मन:स्थितासामाजिकभावना दूराभूता भवति इति कत्वा मौलिकचेतनाकौशलस्य व्यवहार: अवश्यं भवात एक

**७) वैदेशिकनीतिनिर्धारणसमास्या -**

संसार सर्वेऽपि सुखं वाञ्छन्त्येव एवं सुखेन स्थातुं सर्वे: सह सम्यग्भावेन स्थातव्यं येन यो कृते लाभाय। सुखेन स्थात्मन्यदेशेन सह यदा वैदेशिकनीति: अपेक्षते वैदेशिकनीतिं विना राष्ट्र मृत्युप्रायमेव।

समाधानम् - तादृश्य: समस्याया: निराकरणाय वैज्ञानिकरीत्या प्रयुक्तिविद्याद्वारा सम्बन्ध संस्थाप्य सुखेन तिष्ठन्ति। अत: अस्या: समस्याया: निराकरणाय प्रयुक्तिविद्याया: आवश्यकता अस्ति एव।

**८) शिक्षाप्रसारसमस्या -**

उच्यते – "विद्यया विहीन : पशुभिः समान." इति। अर्थात् विद्याहीनजन: पशुभिः सह समान इति। पुन: शिक्षायां प्रगतिशीलराष्ट्र प्रगतिशीलराष्ट्रत्वेन परिगण्यते परन्तु तादृशस्थानमद्यावधि न वर्तते यत्र

शिक्षायाः प्रसार नास्ति। एवं च ये शिक्षाविषये किमपि न जानन्ति येन तेषां हानिः भवति एवं तेन देशस्य हानिर्भवति।

समाधानम् - एतस्या समस्यायाः निराकरणाय आदौ तेषां मनसि मौलिकचेतनाजागरणीया एवञ्च तान् सर्वान् शिक्षाधिग्रहणाय प्रेरणीया प्रोत्साहनीयाश्च भवन्ति। तेन समस्यायाः समाधानं भवितुमर्हति।

**९) कृषिकार्यसमस्या**

कृषिप्रधानदेशो भवति अस्माकं भारतवर्षम्। यत्र प्रायः जनाः कृषिं कृत्वा जीवनयापनं कुर्वन्ति। कृषिद्वारा एतस्य देशस्य आर्थिकस्थितिः सुदृढा भवति। परन्तु कृषकाः मृत्तिकाविषये किमपि न विज्ञाय कृषिकार्यं कुर्वन्ति येन अनुर्वर मृतिकायां सम्यक् शस्य उत्पादनं न भवति।

समाधानम् - प्रयुक्तिविद्यायां निर्मितमेकं यन्त्रमस्ति येन मृत्तिकाया उर्वरता अनुर्वरता ज्ञातुं शक्यते। येन तदनुयायि कृषिकार्य क्रियते चेत्कदापि हानिर्न भवति।

**१०) नैतिक-सामाजिक-संस्कार-समस्या**

महान् दार्शनिकः (Green) ग्रीन् महोदयः प्रतिपादयति यत् व्यक्ते विकासे राष्ट्रस्य विकासः। व्यक्तेः पार्श्वे अवश्यं नैतिकज्ञानं स्यात् ; येन स उत्तमविचारं कर्तुं शक्नुयात्। इदानीन्तनसमाजे बहुलतया राष्ट्रास्पृश्यता, वेश्यावृतिः, बाल्यविवाहः, अज्ञता अशिक्षिताः च विद्यन्ते येन राष्ट्रप्यहानिरेव भवति न प्रगति।

**समाधानम –**

ये ये एतादृशाः सन्ति तान् सर्वान् तेषु तेषु कार्येषु निवर्त्य मौलिकचेतनामाध्यमेन काय प्रोत्साहनं दत्वा देशस्य प्रगतये प्रेरणा प्रदातव्या ; येन राष्ट्रस्य विकाशः सम्भवति एव।**उपसंहारः**

इदानीन्तनसमाजे सर्वत्र समस्या एव परिलक्षन्ते। ताः सर्वाः अपि समस्याः अवश्य परिहर्तव्या भवन्ति। ताः समस्याः परिहाराय द्वयोरपि कौशलयोः आवश्यकता वर्तते। परन्तु प्रायः

सर्वजनादृतमौलिकचेतनामाध्यमेन यथा समस्याया: समाधानं भवति तथा प्रयुक्तिविद्यामाध्यमेन भवितुं नार्हति इति मम आशयः।

**उदाहरण –**

यु.एस्.ए., फ्रानस्, भवतु सर्वत्र प्रयुक्तिविद्याया: प्राबल्यं परिलक्ष्यते ; परन्तु तत्र मौलिक चेतनाया अभाव अस्ति इति हेतोः तत्रत्यजन: अस्माकं भारतवर्षस्य संस्कारादिविषये ज्ञातुं आग्रहं प्रकाशयति। तथैव प्रयुक्तिविद्याया: अपि प्राधान्यं अस्ति एव परन्तु शुसासनव्यवस्थायै प्रयुक्तिविद्या मौलिकचेतना उभेऽपि अनिवार्ये भवतः।

**सन्दर्भग्रन्थसूची**


1. संस्कृत शास्त्र का इतिहास, बलदेव उपाध्याय, शारदा मंदिर, वाराणसी, 1969
2. मनुस्मृतिः, मोतीलाल बनारसीदास-दिल्ली,1983
3. अर्थशास्त्रम्, कौटील्यः,वाचस्पति गैरोला, चौखम्बासंस्करणम्, काशी
4. नीतिशतकम्, भर्तृहरिः, चौखाम्बा संस्करणम् काशी,
5. वर्तमान भारत,. स्वामी विवेकानन्दः, श्रीरामकृष्ण आश्रम, नागपूर्,मध्यप्रदेशः
6. आर्थिक पर्यावरण, साहित्यभवन् पाब्लिकेशन
7. स्वास्थ्य शिक्षा ओर् पर्यावरण अध्यायनम्, विवेक कुमार सिंह-, के एस के पाब्लिकेशन,